dayAshatakam

# દયાશતકમ્

## Document Information

Text title : shrIdayAshatakam 1

File name : dayAshatakam.itx

Category : shataka, vishhnu, venkateshwara, stotra, vishnu, vedAnta-deshika

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada, T K Gopalan tkgopalan at gmail.com, PSA Easwaran

Latest update : August 11, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2024

*sanskritdocuments.org*

# દયાશતકમ્

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ।
શ્રીમાન્વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

શ્રીઃ ।
પ્રપદ્યે તં ગિરિં પ્રાયઃ શ્રીનિવાસાનુકમ્પયા ।
ઇક્ષુસારસ્રવન્ત્યેવ યન્મૂર્ત્યા શર્કરાયિતમ્ ॥ ૧॥

વિગાહે તીર્થબહુલાં શીતલાં ગુરુસન્તતિમ્ ।
શ્રીનિવાસદયામ્ભોધિપરીવાહપરમ્પરામ્ ॥ ૨॥

કૃતિનઃ કમલાવાસકારુણ્યૈકાન્તિનો ભજે ।
ધત્તે યત્સૂક્તિરૂપેણ ત્રિવેદી સર્વયોગ્યતામ્ ॥ ૩॥

પરાશરમુખાન્વન્દે ભગીરથનયે સ્થિતાન્ ।
કમલાકાન્તકારુણ્યગઙ્ગાપ્લાવિતમદ્વિધાન્ ॥ ૪॥

અશેષવિઘ્નશમનમનીકેશ્વરમાશ્રયે ।
શ્રીમતઃ કરુણામ્ભોધૌ શિક્ષાસ્રોત ઇવોત્થિતમ્ ॥ ૫॥

સમસ્તજનનીં વન્દે ચૈતન્યસ્તન્યદાયિનીમ્ ।
શ્રેયસીં શ્રીનિવાસસ્ય કરુણામિવ રૂપિણીમ્ ॥ ૬॥

વન્દે વૃષગિરીશસ્ય મહિષીં વિશ્વધારિણીમ્ ।
તત્કૃપાપ્રતિઘાતાનાં ક્ષમયા વારણં યયા ॥ ૭॥

નિશામયતુ માં નીલા યદ્ભોગપટલૈર્ધ્રુવમ્ ।
ભાવિતં શ્રીનિવાસસ્ય ભક્તદોષેષ્વદર્શનમ્ ॥ ૮॥

કમપ્યનવધિં વન્દે કરુણાવરુણાલયમ્ ।
વૃષશૈલતટસ્થાનાં સ્વયં વ્યક્તિમુપાગતમ્ ॥ ૯॥

અકિઞ્ચનનિધિં સૂતિમપવર્ગત્રિવર્ગયોઃ ।
અઞ્જનાદ્રીશ્વરદયામભિષ્ટૌમિ નિરઞ્જનામ્ ॥ ૧૦॥

અનુચરશક્ત્યાદિગુણામગ્રેસરબોધવિરચિતાલોકામ્ ।
સ્વાધીનવૃષગિરીશાં સ્વયં પ્રભૂતાં પ્રમાણયામિ દયામ્ ॥ ૧૧॥

અપિ નિખિલલોકસુચરિતમુષ્ટિન્ધયદુરિતમૂર્ચ્છનાજુષ્ટમ્ ।
સઞ્જીવયતુ દયે મામઞ્જનગિરિનાથરઞ્જની ભવતી ॥ ૧૨॥

ભગવતિ દયે ભવત્યા વૃષગિરિનાથે સમાપ્લુતે તુઙ્ગે ।
અપ્રતિઘમજ્જનાનાં હસ્તાલમ્બો મદાગસાં મૃગ્યઃ ॥ ૧૩॥

કૃપણજનકલ્પલતિકાં કૃતાપરાધસ્ય નિષ્ક્રિયામાદ્યામ્ ।
વૃષગિરિનાથદયે ત્વાં વિદન્તિ સંસારતારિણીં વિબુધાઃ ॥ ૧૪॥

વૃષગિરિગૃહમેધિગુણા બોધબલૈશ્વર્યવીર્યશક્તિમુખાઃ ।
દોષા ભવેયુરેતે યદિ નામ દયે ત્વયા વિનાભૂતાઃ ॥ ૧૫॥

આસૃષ્ટિ સન્તતાનામપરાધાનાં નિરોધિનીં જગતઃ ।
પદ્માસહાયકરુણે પ્રતિસઞ્ચરકેલિમાચરસિ ॥ ૧૬॥

અચિદવિશિષ્ટાન્પ્રલયે જન્તૂનવલોક્ય જાતનિર્વેદા ।
કરણકલેવરયોગં વિતરસિ વૃષશૈલનાથકરુણે ત્વમ્ ॥ ૧૭॥

અનુગુણદશાર્પિતેન શ્રીધરકરુણે સમાહિતસ્નેહા ।
શમયસિ તમઃ પ્રજાનાં શાસ્ત્રમયેન સ્થિરપ્રદીપેન ॥ ૧૮॥

રુઢા વૃષાચલપતેઃ પાદે મુખકાન્તિપત્રલચ્છાયા ।
કરુણે સુખયસિ વિનતાન્કટાક્ષવિટપૈઃ કરાપચેયફલૈઃ ॥ ૧૯॥

નયને વૃષાચલેન્દોસ્તારામૈત્રીં દધાનયા કરુણે ।
દૃષ્ટસ્ત્વયૈવ જનિમાનપવર્ગમકૃષ્ટપચ્યમનુભવતિ ॥ ૨૦॥

સમયોપનતૈસ્તવ પ્રવાહૈરનુકમ્પે કૃતસમ્પ્લવા ધરિત્રી ।
શરણાગતસસ્યમાલિનીયં વૃષશૈલેશકૃષીવલં ધિનોતિ ॥ ૨૧॥

કલશોદધિસમ્પદો ભવત્યાઃ કરુણે સન્મતિમન્થસંસ્કૃતાયાઃ ।
અમૃતાંશમવૈમિ દિવ્યદેહં મૃતસઞ્જીવનમઞ્જનાચલેન્દોઃ ॥ ૨૨॥

જલધેરિવ શીતતા દયે ત્વં વૃષશૈલાધિપતેસ્સ્વભાવભૂતા ।
પ્રલયારભટીનટીં તદીક્ષાં પ્રસભં ગ્રાહયસિ પ્રસત્તિલાસ્યમ્ ॥ ૨૩॥

પ્રણતપ્રતિકૂલમૂલઘાતી પ્રતિઘઃ કોઽપિ વૃષાચલેશ્વરસ્ય ।
કલમે યવસાપચાયનીત્યા કરુણે કિઙ્કરતાં તવોપયાતિ ॥ ૨૪॥

અબહિષ્કૃતનિગ્રહાન્વિદન્તઃ કમલાકાન્તગુણાન્સ્વતન્ત્રતાદીન્ ।
અવિકલ્પમનુગ્રહં દુહાનાં ભવતીમેવ દયે ભજન્તિ સન્તઃ ॥ ૨૫॥

કમલાનિલયસ્ત્વયા દયાલુઃ કરુણે નિષ્કરુણા નિરૂપણે ત્વમ્ ।
અત એવ હિ તાવકાશ્રિતાનાં દુરિતાનાં ભવતિ ત્વદેવ ભીતિઃ ॥ ૨૬॥

અતિલઙ્ઘિતશાસનેષ્વભીક્ષ્ણં વૃષશૈલાધિપતિર્વિજૃમ્ભિતોષ્મા ।
પુનરેવ દયે ક્ષમાનિદાનૈર્ભવતીમાદ્રિયતે ભવત્યધીનૈઃ ॥ ૨૭॥

કરુણે દુરિતેષુ મામકેષુ પ્રતિકારાન્તરદુર્જયેષુ ખિન્નઃ ।
કવચાયિતયા ત્વયૈવ શાર્ઙ્ગી વિજયસ્થાનમુપાશ્રિતો વૃષાદ્રિમ્ ॥ ૨૮॥

મયિ તિષ્ઠતિ દુષ્કૃતાં પ્રધાને મિતદોષાનિતરાન્વિચિન્વતી ત્વમ્ ।
અપરાધગણૈરપૂર્ણકુક્ષિઃ કમલાકાન્તદયે કથં ભવિત્રી ॥ ૨૯॥

અહમસ્મ્યપરાધચક્રવર્તી કરુણે ત્વં ચ ગુણેષુ સાર્વભૌમી ।
વિદુષી સ્થિતિમીદૃશીં સ્વયં માં વૃષશૈલેશ્વરપાદસાત્કુરુ ત્વમ્ ॥ ૩૦॥

અશિથિલકરણેઽસ્મિન્નક્ષતશ્વાસવૃત્તૌ
   વપુષિ ગમનયોગ્યે વાસમાસાદયેયમ્ ।
વૃષગિરિકટકેષુ વ્યઞ્જયત્સુ પ્રતીતૈ-
   ર્મધુમથનદયે ત્વાં વારિધારાવિશેષૈઃ ॥ ૩૧॥

અવિદિતનિજયોગક્ષેમમાત્માનભિજ્ઞં
   ગુણલવરહિતં માં ગોમુકામા દયે ત્વમ્ ।
પરવતિ ચતુરૈસ્તે વિભ્રમૈઃ શ્રીનિવાસે
   બહુમતિમનપાયાં વિન્દસિ શ્રીધરણ્યોઃ ॥ ૩૨॥

ફલવિતરણદક્ષં પક્ષપાતાનભિજ્ઞં
   પ્રગુણમનુવિધેયં પ્રાપ્ય પદ્માસહાયમ્ ।
મહતિ ગુણસમાજે માનપૂર્વં દયે ત્વં
   પ્રતિવદસિ યથાર્હં પાપ્મનાં મામકાનામ્ ॥ ૩૩॥

અનુભવિતુમઘૌઘં નાલમાગામિકાલઃ
   પ્રશમયિતુમશેષં નિષ્ક્રિયાભિર્ન શક્યમ્ ।

સ્વયમિતિ હિ દયે ત્વં સ્વીકૃતશ્રીનિવાસા
   શિથિલિતભવભીતિઃ શ્રેયસે જાયસે નઃ ॥ ૩૪॥

અવતરણવિશેષૈરાત્મલીલાપદેશૈ-
રવમતિમનુકમ્પે મન્દચિત્તેષુ વિન્દન્ ।
વૃષભશિખરિનાથસ્ત્વન્નિદેશેન નૂનં
   ભજતિ શરણભાજાં ભાવિનો જન્મભેદાન્ ॥ ૩૫॥

પરહિતમનુકમ્પે ભાવયન્ત્યાં ભવત્યાં
   સ્થિરમનુપધિ હાર્દં શ્રીનિવાસો દધાનઃ ।
લલિતરુચિષુ લક્ષ્મીભૂમિનીલાસુ નૂનં
   પ્રથયતિ બહુમાનં ત્વત્પ્રતિચ્છન્દબુદ્ધ્યા ॥ ૩૬॥

વૃષગિરિસવિધેષુ વ્યાજતો વાસભાજાં
   દુરિતકલુષિતાનાં દૂયમાના દયે ત્વમ્ ।
કરણવિલયકાલે કાન્દિશીકસ્મૃતીનાં
   સ્મરયસિ બહુલીલં માધવં સાવધાના ॥ ૩૭॥

દિશિ દિશિ ગતિવિદ્ભિર્દેશિકૈર્નીયમાના
   સ્થિરતરમનુકમ્પે સ્ત્યાનલગ્ના ગુણૈસ્ત્વમ્ ।
પરિગતવૃષશૈલં પારમારોપયન્તી
   ભવજલધિગતાનાં પોતપાત્રી ભવિત્રી ॥ ૩૮॥

પરિમિતફલસઙ્ગાત્પ્રાણિનઃ કિમ્પચાના
   નિગમવિપણિમધ્યે નિત્યમુક્તાનુષક્તમ્ ।
પ્રસદનમનુકમ્પે પ્રાપ્તવત્યા ભવત્યા
   વૃષગિરિહરિનીલં વ્યઞ્જિતં નિર્વિશન્તિ ॥ ૩૯॥

ત્વયિ બહુમતિહીનઃ શ્રીનિવાસાનુકમ્પે
   જગતિ ગતિમિહાન્યાં દેવિ સંમન્યતે યઃ ।
સ ખલુ વિબુધસિન્ધૌ સન્નિકર્ષે વહન્ત્યાં
   શમયતિ મૃગતૃષ્ણાવીચિકાભિઃ પિપાસામ્ ॥ ૪૦॥

આજ્ઞાં ખ્યાતિં ધનમનુચરાનાધિરાજ્યાદિકં વા
   કાલે દૃષ્ટ્વા કમલવસતેરપ્યકિઞ્ચિત્કરાણિ ।
પદ્માકાન્તં પ્રણિહિતવતીં પાલનેઽનન્યસાધ્યે
   સારાભિજ્ઞા જગતિ કૃતિનસ્સંશ્રયન્તે દયે ત્વામ્ ॥ ૪૧॥

પ્રાજાપત્યપ્રભૃતિવિભવં પ્રેક્ષ્ય પર્યાયદુઃખં
   જન્માકાઙ્ક્ષન્વૃષગિરિવને જગ્મુષાં તસ્થુષાં વા ।
આશાસાનાઃ કતિચન વિભોસ્ત્વત્પરિષ્વઙ્ગધન્યૈ-
   રઙ્ગીકારં ક્ષણમપિ દયે હાર્દતુઙ્ગૈરપાઙ્ગૈઃ ॥ ૪૨ ॥

નાભીપદ્મસ્ફુરણસુભગા નવ્યનીલોત્પલાભા
   ક્રીડાશૈલં કમપિ કરુણે વૃણ્વતી વેઙ્કટાખ્યમ્ ।
શીતા નિત્યં પ્રસદનવતી શ્રદ્ધધાનાવગાહ્યા
   દિવ્યા કાચિજ્જયતિ મહતી દીર્ઘિકા તાવકીના ॥ ૪૩ ॥

યસ્મિન્દૃષ્ટે તદિતરસુખૈર્ગમ્યતે ગોષ્પદત્વં
   સત્યં જ્ઞાનં ત્રિભિરવધિભિર્મુક્તમાનન્દસિન્ધુમ્ ।
ત્વત્સ્વીકારાત્તમિહ કૃતિનસ્સૂરિવૃન્દાનુભાવ્યં
   નિત્યાપૂર્વં નિધિમિવ દયે નિર્વિશન્ત્યઞ્જનાદ્રૌ ॥ ૪૪ ॥

સારં લબ્ધ્વા કમપિ મહતઃ શ્રીનિવાસામ્બુરાશેઃ
   કાલે કાલે ઘનરસવતી કાલિકેવાનુકમ્પે ।
વ્યક્તોન્મેષા મૃગપતિગિરૌ વિશ્વમાપ્યાયયન્તી
   શીલોપજ્ઞં ક્ષરતિ ભવતી શીતલં સદ્ગુણૌઘમ્ ॥ ૪૫ ॥

ભીમે નિત્યં ભવજલનિધૌ મજ્જતાં માનવાના-
માલમ્બાર્થં વૃષગિરિપતિસ્ત્વન્નિદેશાત્પ્રયુંક્તે ।
પ્રજ્ઞાસારં પ્રકૃતિમહતા મૂલભાગેન જુષ્ટં
   શાખાભેદૈસ્સુભગમનઘં શાશ્વતં શાસ્ત્રપાણિમ્ ॥ ૪૬ ॥

વિદ્વત્સેવાકતકનિકષૈર્વીતપઙ્કાશયાનાં
   પદ્માકાન્તઃ પ્રણયતિ દયે દર્પણં તે સ્વશાસ્ત્રમ્ ।
લીલાદક્ષાં ત્વદનવસરે લાલયન્વિપ્રલિપ્સાં
   માયાશાસ્ત્રાણ્યપિ શમયિતું ત્વત્પ્રપન્નપ્રતીપાન્ ॥ ૪૭ ॥

દૈવાત્પ્રાપ્તે વૃષગિરિતટં દેહિનિ ત્વન્નિદાનાત્
   સ્વામિન્પાહીત્યવશવચને વિન્દતિ સ્વાપમન્ત્યમ્ ।
દેવઃ શ્રીમાન્ દિશતિ કરુણે દૃષ્ટિમિચ્છંસ્ત્વદીયા-
   મુદ્ઘાતેન શ્રુતિપરિષદામુત્તરેણાભિમુખ્યમ્ ॥ ૪૮ ॥

શ્રેયઃસૂતિં સકૃદપિ દયે સમ્મતાં યસ્સખીં તે

શીતોદારામલભત જનઃ શ્રીનિવાસસ્ય દૃષ્ટિમ્ ।
દેવાદીનામયમનૃણતાં દેહવત્ત્વેઽપિ વિન્દન્
બન્ધાન્મુક્તો બલિભિરનઘૈઃ પૂર્યતે તત્પ્રયુક્તૈઃ ॥ ૪૯॥

દિવ્યાપાઙ્ગં દિશસિ કરુણે યેષુ સદ્દેશિકાત્મા
ક્ષિપ્રં પ્રાપ્તા વૃષગિરિપતિં ક્ષત્રબન્ધ્વાદયસ્તે ।
વિશ્વાચાર્યા વિધિશિવમુખાસ્સ્વાધિકારોપરુદ્ધા
મન્યે માતા જડ ઇવ સુતે વત્સલા માદૃશે ત્વમ્ ॥ ૫૦॥

અતિકૃપણોઽપિ જન્તુરધિગમ્ય દયે ભવતી-
મશિથિલધર્મસેતુપદવીં રુચિરામચિરાત્ ।
અમિતમહોર્મિજાલમતિલઙ્ઘ્ય ભવામ્બુનિધિં
ભવતિ વૃષાચલેશપદપત્તનનિત્યધની ॥ ૫૧॥

અભિમુખભાવસમ્પદભિસમ્ભવિનાં ભવિનાં
ક્વચિદુપલક્ષિતા ક્વચિદભઙ્ગુરગૂઢગતિઃ ।
વિમલરસાવહા વૃષગિરીશદયે ભવતી
સપદિ સરસ્વતીવ શમયત્યઘમપ્રતિઘમ્ ॥ ૫૨॥

અપિ કરુણે જનસ્ય તરુણેન્દુવિભૂષણતા-
મપિ કમલાસનત્વમપિ ધામ વૃષાદ્રિપતેઃ ।
તરતમતાવશેન તનુતે નનુ તે વિતતિઃ
પરહિતવર્ષ્મણા પરિપચેલિમકેલિમતી ॥ ૫૩॥

ધૃતભુવના દયે ત્રિવિધગત્યનુકૂલતરા
વૃષગિરિનાથપાદપરિરમ્ભવતી ભવતી ।
અવિદિતવૈભવાઽપિ સુરસિન્ધુરિવાતનુતે
સકૃદવગાહમાનમપતાપમપાપમપિ ॥ ૫૪॥

નિગમસમાશ્રિતા નિખિલલોકસમૃદ્ધિકરી
ભજદઘકૂલમુદ્રુજગતિઃ પરિતપ્તહિતા ।
પ્રકટિતહંસમત્સ્યકમઠાદ્યવતારશતા
વિબુધસરિચ્છ્રિયં વૃષગિરીશદયે વહસિ ॥ ૫૫॥

જગતિ મિતમ્પચા ત્વદિતરા તુ દયે તરલા
ફલનિયમોજ્ઝિતા ભવતિ સન્તપનાય પુનઃ ।
ત્વમિહ નિરઙ્કુશપ્રશકનાદિવિભૂતિમતી

વિતરસિ દેહિનાં નિરવધિં વૃષશૈલનિધિમ્ ॥ ૫૬॥

સકરુણલૌકિકપ્રભુપરિગ્રહનિગ્રહયો-
ર્નિયતિમુપાધિચક્રપરિવૃત્તિપરમ્પરયા ।
વૃષભમહીધરેશકરુણે વિતરઙ્ગયતાં
શ્રુતિમિતસમ્પદિ ત્વયિ કથં ભવિતા વિશયઃ ॥ ૫૭॥

વૃષગિરિકૃષ્ણમેઘજનિતાં જનિતાપહરાં
ત્વદભિમતિં સુવૃત્તિમુપજીવ્ય નિવૃત્તતૃષઃ ।
બહુષુ જલાશયેષુ બહુમાનમપોહ્ય દયે
ન જહતિ સત્પથં જગતિ ચાતકવત્કૃતિનઃ ॥ ૫૮॥

ત્વદુદયતૂલિકાભિરમુના વૃષશૈલજુષા
સ્થિરચરશિલ્પિનૈવ પરિકલ્પિતચિત્રધિયઃ ।
યતિપતિયામુનપ્રભૃતયઃ પ્રથયન્તિ દયે
જગતિ હિતં ન નસ્ત્વયિ ભરન્યસનાદધિકમ્ ॥ ૫૯॥

મૃદુહૃદયે દયે મૃદિતકામહિતે મહિતે
ધૃતવિબુધે બુધેષુ વિતતાત્મધુરે મધુરે ।
વૃષગિરિસાર્વભૌમદયિતે મયિ તે મહતીં
ભવુકનિધે નિધેહિ ભવમૂલહરાં લહરીમ્ ॥ ૬૦॥

અકૂપારૈરેકોદકસમયવૈતણ્ડિકજવૈ-
રનિર્વાપ્યાં ક્ષિપ્રં ક્ષપયિતુમવિદ્યાખ્યબડવામ્ ।
કૃપે ત્વં તત્તાદૃક્પ્રથિમવૃષપૃથ્વીધરપતિ-
સ્વરૂપદ્વૈગુણ્યદ્વિગુણનિજબિન્દુઃ પ્રવહસિ ॥ ૬૧॥

વિવિત્સાવેતાલીવિગમપરિશુદ્ધેઽપિ હૃદયે
પટુપ્રત્યાહારપ્રભૃતિપુટપાકપ્રચકિતાઃ ।
નમન્તસ્ત્વાં નારાયણશિખરિકૂટસ્થકરુણે
નિરુદ્ધત્વદ્દ્રોહા નૃપતિસુતનીતિં ન જહતિ ॥ ૬૨॥

અનન્યાધીનસ્સન્ભવતિ પરતન્ત્રઃ પ્રણમતાં
કૃપે સર્વદ્રષ્ટા ન ગણયતિ તેષામપકૃતિમ્ ।
પતિસ્ત્વત્પારાર્થ્યં પ્રથયતિ વૃષક્ષ્માધરપતિ-
ર્વ્યવસ્થાં વૈયાત્યાદિતિ વિઘટયન્તી વિહરસિ ॥ ૬૩॥

અપાં પત્યુશ્શત્રૂનસહનમુનેર્ધર્મનિગલં
  કૃપે કાકસ્યૈકં હિતમિતિ હિનસ્તિ સ્મ નયનમ્ ।
વિલીનસ્વાતન્ત્ર્યો વૃષગિરિપતિસ્ત્વદ્વિહૃતિભિ-
  ર્દિશત્યેવં દેવો જનિતસુગતિં દણ્ડનગતિમ્ ॥ ૬૪॥

નિષાદાનાં નેતા કપિકુલપતિઃ કાપિ શબરી
  કુચેલઃ કુબ્જા સા વ્રજયુવતયો માલ્યકૃદિતિ ।
અમીષાં નિમ્નત્વં વૃષગિરિપતેરુન્નતિમપિ
  પ્રભૂતૈઃ સ્રોતોભિઃ પ્રસભમનુકમ્પે સમયસિ ॥ ૬૫॥

ત્વયા દૃષ્ટસ્તુષ્ટિં ભજતિ પરમેષ્ઠી નિજપદે
  વહન્મૂર્તિરષ્ટૌ વિહરતિ મૃડાનીપરિવૃઢઃ ।
બિભર્તિ સ્વારાજ્યં વૃષશિખરિશૃઙ્ગારિકરુણે
  શુનાસીરો દેવાસુરસમરનાસીરસુભટઃ ॥ ૬૬॥

દયે દુગ્ધોદન્વદ્વ્યતિયુતસુધાસિન્ધુનયત-
  સ્ત્વદાશ્લેષાન્નિત્યં જનિતમૃતસંજીવનદશાઃ ।
સ્વદન્તે દાન્તેભ્યઃ શ્રુતિવદનકર્પૂરગુલિકા
  વિષુણ્વન્તશ્ચિત્તં વૃષશિખરિવિશ્વમ્ભરગુણાઃ ॥ ૬૭॥

જગજ્જન્મસ્થેમપ્રલયરચનાકેલિરસિકો
  વિમુક્ત્યેકદ્વારં વિઘટિતકવાટં પ્રણયિનામ્ ।
ઇતિ ત્વય્યાયત્તં દ્વિતયમુપધીકૃત્ય કરુણે
  વિશુદ્ધાનાં વાચાં વૃષશિખરિનાથઃ સ્તુતિપદમ્ ॥ ૬૮॥

કલિક્ષોભોન્મીલત્ક્ષિતિકલુષકૂલઙ્કુષજવૈ-
  રનુચ્છેદૈ રેતૈરવટતટવૈષમ્યરહિતૈઃ ।
પ્રવાહૈસ્તે પદ્માસહચરપરિષ્કારિણિ કૃપે
  વિકલ્પન્તેઽનલ્પા વૃષશિખરિણો નિર્ઝરગુણાઃ ॥ ૬૯॥ વિકલ્પ્યન્તે
ખિલં ચેતોવૃત્તેઃ કિમિદમિતિ વિસ્મેરભુવનં
  કૃપે સિંહક્ષ્માભૃત્કૃતમુખચમત્કારકરણમ્ ।
ભરન્યાસચ્છન્નપ્રબલવૃજિનપ્રાભૃતભૃતાં
  પ્રતિપ્રસ્થાનં તે શ્રુતિનગરશૃઙ્ગાટકજુષઃ ॥ ૭૦॥

ત્રિવિધચિદચિત્સત્તાસ્થેમપ્રવૃત્તિનિયામિકા
  વૃષગિરિવિભોરિચ્છા સા ત્વં પરૈરપરાહતા ।

કૃપણભરભૃત્કિઙ્કુર્વાણપ્રભૂતગુણાન્તરા
   વહસિ કરુણે વૈચક્ષણ્યં મદીક્ષણસાહસે ॥ ૭૧॥

વૃષગિરિપતેર્હૃદ્યા વિશ્વાવતારસહાયિની
   ક્ષપિતનિખિલાવદ્યા દેવિ ક્ષમાદિનિષેવિતા ।
ભુવનજનની પુંસાં ભોગાપવર્ગવિધાયિની
   વિતમસિ પદે વ્યક્તિં નિત્યાં બિભર્ષિ દયે સ્વયમ્ ॥ ૭૨॥

સ્વયમુદયિનસ્સિદ્ધાધાવિષ્કૃતાશ્ચ શુભાલયા
   વિવિધવિભવવ્યૂહાવાસાઃ પરં ચ પદં વિભોઃ ।
વૃષગિરિમુખેષ્વેતેષ્વિચ્છાવધિ પ્રતિલબ્ધયે
   દૃઢવિનિહિતા નિશ્રેણિસ્ત્વં દયે નિજપર્વભિઃ ॥ ૭૩॥

હિતમિતિ જગદૃષ્ટ્યા કૢપ્તૈરકૢપ્તફલાન્તરૈ-
   રમતિવિહિતૈરન્યૈર્ધર્માયિતૈશ્ચ યદૃચ્છયા ।
પરિણતબહુચ્છદ્મા પદ્માસહાયદયે સ્વયં
   પ્રદિશસિ નિજાભિપ્રેતં નઃ પ્રશામ્યદપત્રપા ॥ ૭૪॥

અતિવિધિશિવૈરૈશ્વર્યાત્માનુભૂતિરસૈર્જનાન્-
   અહૃદયમિહોપચ્છન્દ્યૈષામસઙ્ગદશાર્થિની ।
તૃષિતજનતાતીર્થસ્નાનક્રમક્ષપિતૈનસાં
   વિતરસિ દયે વીતાતઙ્કા વૃષાદ્રિપતેઃ પદમ્ ॥ ૭૫॥

વૃષગિરિસુધાસિન્ધૌ જન્તુર્દયે નિહિતસ્ત્વયા
   ભવભયપરીતાપચ્છિત્યૈ ભજન્નઘમર્ષણમ્ ।
મુષિતકલુષો મુક્તેરગ્રેસરૈરભિપૂર્યતે
   સ્વયમુપનતૈસ્સ્વાત્માનન્દપ્રભૃત્યનુબન્ધિભિઃ ॥ ૭૬॥

અનિતરજુષામન્તર્મૂલેઽપ્યપાયપરિપ્લવે
   કૃતવિદનઘા વિચ્છિથ્યૈષાં કૃપે યમવશ્યતામ્ ।
પ્રપદનફલપ્રત્યાદેશપ્રસઙ્ગવિવર્જિતં
   પ્રતિવિધિમુપાધત્સે સાર્ધં વૃષાદ્રિહિતૈષિણા ॥ ૭૭॥

ક્ષણવિલયિનાં શાસ્ત્રાર્થાનાં ફલાય નિવેશિતે
   પિતૃસુરગણે નિર્વેશાત્પ્રાગપિ પ્રલયં ગતે । સુરપિતૃગણે
અધિગતવૃષક્ષ્માભૃન્નાથામકાલવશંવદાં
   પ્રતિભુવમિહ વ્યાચખ્યુસ્ત્વાં કૃપે નિરુપપ્લવામ્ ॥ ૭૮॥

ત્વદુપસદનાદદ્ય શ્વો વા મહાપ્રલયેઽપિ વા
   વિતરતિ નિજં પાદામ્ભોજં વૃષાચલશેખરઃ ।
તદિહ કરુણે તત્તત્ક્રીડાતરઙ્ગપરમ્પરા-
   તરતમતયા જુષ્ટાયાસ્તે દુરત્યયતાં વિદુઃ ॥ ૭૯ ॥

પ્રણિહિતધિયાં ત્વત્સમ્પૃક્તે વૃષાદ્રિશિખામણૌ
   પ્રસૃમરસુધાધારાકારા પ્રસીદતિ ભાવના ।
દૃઢમિતિ દયે દત્તાસ્વાદં વિમુક્તિવલાહકં
   નિભૃતગરુતો નિધ્યાયન્તિ સ્થિરાશયચાતકાઃ ॥ ૮૦ ॥

કૃપે વિગતવેલયા કૃતસમગ્રપોષૈસ્ત્વયા
   કલિજ્વલનદુર્ગતે જગતિ કાલમેઘાયિતમ્ ।
વૃષક્ષિતિધરાદિષુ સ્થિતિપદેષુ સાનુપ્લવૈ-
   ર્વૃષાદ્રિપતિવિગ્રહૈર્વ્યપગતાખિલાવગ્રહૈઃ ॥ ૮૧ ॥

પ્રસૂય વિવિધં જગત્તદભિવૃદ્ધયે ત્વં દયે
   સમીક્ષણવિચિન્તનપ્રભૃતિભિસ્સ્વયં તાદૃશૈઃ ।
વિચિત્રગુણચિત્રિતાં વિવિધદોષવૈદેશિકીં
   વૃષાચલપતેસ્તનું વિશસિ મત્સ્યકૂર્માદિકામ્ ॥ ૮૨ ॥

યુગાન્તસમયોચિતં ભજતિ યોગનિદ્રારસં
   વૃષક્ષિતિભૃદીશ્વરે વિહરણક્રમાજ્જાગ્રતિ ।
ઉદીર્ણચતુરર્ણવીકદનવેદિનીં મેદિનીં
   સમુદ્ધૃતવતી દયે ત્વદભિજુષ્ટયા દંષ્ટ્રયા ॥ ૮૩ ॥

સટાપટલભીષણે સરભસાટ્ટહાસોદ્ભટે
   સ્ફુરત્ક્રુધિ પરિસ્ફુટદ્ભ્રુકુટિકેઽપિ વક્ત્રે કૃતે ।
દયે વૃષગિરીશિતુર્દનુજડિમ્ભદત્તસ્તના
   સરોજસદૃશા દૃશા સમુદિતાકૃતિર્દૃશ્યસે ॥ ૮૪ ॥

પ્રસક્તમધુના વિધિપ્રણિહિતૈઃ સપર્યોદકૈઃ
   સમસ્તદુરિતચ્છિદા નિગમગન્ધિના ત્વં દયે ।
અશેષમવિશેષતસ્ત્રિજગદઞ્જનાદ્રીશિતુ-
   શ્ચરાચરમચીકરશ્ચરણપઙ્કજેનાઙ્કિતમ્ ॥ ૮૫ ॥

પરશ્વધતપોધનપ્રથનસત્ક્રતૂપાકૃત-

ક્ષિતીશ્વરપશુક્ષરત્ક્ષતજકુઙ્કુમસ્થાસકૈઃ ।
વૃષાચલદયાલુના નનુ વિહર્તુમાલિપ્યથાઃ
નિધાય હૃદયે દયે નિહતરક્ષિતાનાં હિતમ્ ॥ ૮૬॥

કૃપે કૃતજગદ્ધિતે કૃપણજન્તુચિન્તામણે
રમાસહચરં ક્ષિતૌ રઘુધુરીણયન્ત્યા ત્વયા ।
વ્યભજ્યત સરિત્પતિસ્સકૃદવેક્ષણાત્તત્ક્ષણાત્-
પ્રકૃષ્ટબહુપાતકપ્રશમહેતુના સેતુના ॥ ૮૭॥

કૃપે પરવતસ્ત્વયા વૃષગિરીશિતુઃ ક્રીડિતં
જગદ્ધિતમશેષતસ્તદિદમિત્થમર્થાપ્યતે ।
મદચ્છલપરિચ્યુતપ્રણતદુષ્કૃતપ્રેક્ષિતૈ-
ર્હતપ્રબલદાનવૈર્હલધરસ્ય હેલાશતૈઃ ॥ ૮૮॥

પ્રભૂતવિબુધદ્વિષદ્ભરણખિન્નવિશ્વમ્ભરા-
ભરાપનયનચ્છલાત્ત્વમવતાર્ય લક્ષ્મીધરમ્ ।
નિરાકૃતવતી દયે નિગમસૌધદીપશ્રિયા
વિપશ્ચિદવિગીતયા જગતિ ગીતયાઽન્ધં તમઃ ॥ ૮૯॥

વૃષાદ્રિહયસાદિનઃ પ્રબલદોર્મરુત્પ્રેઙ્ખિત-
સ્ત્વિષા સ્ફુટતટિદ્ગુણસ્ત્વદવસેકસંસ્કારવાન્ ।
કરિષ્યતિ દયે કલિપ્રબલઘર્મનિર્મૂલનઃ
પુનઃ કૃતયુગાઙ્કુરં ભુવિ કૃપાણધારાધરઃ ॥ ૯૦॥

વિશ્વોપકારમિતિ નામ સદા દુહાના-
મદ્યાપિ દેવિ ભવતીમવધીરયન્તમ્ ।
નાથે નિવેશય વૃષાદ્રિપતૌ દયે ત્વં var પતેર્દયે
ન્યસ્તસ્વરક્ષણભરં ત્વયિ માં ત્વયૈવ ॥ ૯૧॥

નૈસર્ગિકેણ તરસા કરુણે નિયુક્તા
નિમ્નેતરેઽપિ મયિ તે વિતતિર્યદિ સ્યાત્ ।
વિસ્માપયેદ્વૃષગિરીશ્વરમપ્યવાર્યા
વેલાતિલઙ્ઘનદશેવ મહામ્બુરાશેઃ ॥ ૯૨॥

વિજ્ઞાતશાસનગતિર્વિપરીતવૃત્ત્યા
વૃત્રાદિભિઃ પરિચિતાં પદવીં ભજામિ ।
એવં વિધે વૃષગિરીશદયે મયિ ત્વં

દીને વિભોશ્શમય દણ્ડધરત્વલીલામ્ ॥ ૯૩॥

માસાહસોક્તિઘનકઞ્ચુકવઞ્ચિતાન્યઃ
પશ્યત્સુ તેષુ વિદધામ્યતિસાહસાનિ ।
પદ્માસહાયકરુણે ન રુણત્સિ કિં ત્વં
ઘોરં કુલિઙ્ગશકુનેરિવ ચેષ્ટિતં મે ॥ ૯૪॥

વિક્ષેપમર્હસિ દયે વિપલાયિતેઽપિ
વ્યાજં વિભાવ્ય વૃષશૈલપતેર્વિહારમ્ ।
સ્વાધીનસત્વસરણિસ્સ્વયમત્ર જન્તૌ
દ્રાઘીયસી દૃઢતરા ગુણવાગુરા ત્વમ્ ॥ ૯૫॥

સન્તન્યમાનમપરાધગણં વિચિન્ત્ય
ત્રસ્યામિ હન્ત ભવતીં ચ વિભાવયામિ ।
અહ્નાય મે વૃષગિરીશદયે જહીમા-
માશીવિષગ્રહણકેલિનિભામવસ્થામ્ ॥ ૯૬॥

ઔત્સુક્યપૂર્વમુપહૃત્ય મહાપરાધાન્
માતઃ પ્રસાદયિતુમિચ્છતિ મે મનસ્ત્વામ્ ।
આલિહ્ય તાન્નિરવશેષમલબ્ધતૃપ્તિ-
સ્તામ્યસ્યહો વૃષગિરીશધૃતા દયે ત્વમ્ ॥ ૯૭॥

જહ્યાદ્વૃષાચલપતિઃ પ્રતિઘેઽપિ ન ત્વાં
ઘર્મોપતપ્ત ઇવ શીતલતામુદન્વાન્ ।
સા મામરુન્તુદભરન્યસનાનુવૃત્તિ-
સ્તદ્વીક્ષણૈઃ સ્પૃશ દયે તવ કેલિપદ્મૈઃ ॥ ૯૮॥

દૃષ્ટેઽપિ દુર્બલધિયં દમનેઽપિ દૃપ્તં
સ્નાત્વાઽપિ ધૂલિરસિકં ભજનેઽપિ ભીમમ્ ।
બદ્ધ્વા ગૃહાણ વૃષશૈલપતેર્દયે માં
ત્વદ્વારણં સ્વયમનુગ્રહશૃઙ્ખલાભિઃ ॥ ૯૯॥

નાતઃ પરં કિમપિ મે ત્વયિ નાથનીયં
માતર્દયે મયિ કુરુષ્વ તથા પ્રસાદમ્ ।
બદ્ધાદરો વૃષગિરિપ્રણયી યથાઽસૌ
મુક્તાનુભૂતિમિહ દાસ્યતિ મે મુકુન્દઃ ॥ ૧૦૦॥

નિસ્સીમવૈભવજુષાં મિષતાં ગુણાનાં
   સ્તોતુર્દયે વૃષગિરીશગુણેશ્વરીં ત્વામ્ ।
તૈરેવ નૂનમવશૈરભિનન્દિતં મે
   સત્યાપિતં તવ બલાદકુતોભયત્વમ્ ॥ ૧૦૧॥

અદ્યાપિ તદ્વૃષગિરીશદયે ભવત્યા-
   મારમ્ભમાત્રમનિદં પ્રથમસ્તુતીનામ્ ।
સન્દર્શિતસ્વપરનિર્વહણા સહેથા
   મન્દસ્ય સાહસમિદં ત્વયિ વન્દિનો મે ॥ ૧૦૨॥

પ્રાયો દયે ત્વદનુભાવમહામ્બુરાશૌ
   પ્રાચેતસપ્રભૃતયોઽપિ પરં તટસ્થાઃ ।
તત્રાવતીર્ણમતલસ્પૃશમાપ્લુતં માં
   પદ્માપતેઃ પ્રહસનોચિતમાદ્રિયેથાઃ ॥ ૧૦૩॥

વેદાન્તદેશિકપદે વિનિવેશ્ય બાલં
   દેવો દયાશતકમેતદવાદયન્મામ્ ।
વૈહારિકેણ વિધિના સમયે ગૃહીતં
   વીણાવિશેષમિવ વેઙ્કટશૈલનાથઃ ॥ ૧૦૪॥

અનવધિમધિકૃત્ય શ્રીનિવાસાનુકમ્પા-
   મવિતથવિષયત્વાદ્વિશ્વમવ્રીડયન્તી ।
વિવિધકુશલનીવી વેઙ્કટેશપ્રસૂતા
   સ્તુતિરિયમનવદ્યા શોભતે સત્વભાજામ્ ॥ ૧૦૫॥

શતકમિદમુદારં સમ્યગભ્યસ્યમાનાન્
   વૃષગિરિમધિરુહ્ય વ્યક્તમાલોકયન્તી ।
અનિતરશરણાનામાધિરાજ્યેઽભિષિઞ્ચે-
   ચ્છમિતવિમતપક્ષા શાર્ઙ્ગધન્વાનુકમ્પા ॥ ૧૦૬॥

વિશ્વાનુગ્રહમાતરં વ્યતિષજત્સ્વર્ગાપવર્ગાં સુધા-
   સધ્રીચીમિતિ વેઙ્કટેશ્વરકવિર્ભક્ત્યા દયામસ્તુત ।
પદ્માનામિહ યદ્વિધેયભગવત્સઙ્કલ્પકલ્પદ્રુમાત્ var  પદ્યાનામિહ
   ઝંઝામારુતધૂતચૂતનયતસ્સામ્પાતિકોઽયં ક્રમઃ ॥ ૧૦૭॥

કામં સન્તુ મિથઃ કરમ્બિતગુણાવદ્યાનિ પદ્યાનિ નઃ
   કસ્યાસ્મિઞ્છતકે સદમ્બુકતકે દોષશ્રુતિં ક્ષામ્યતિ ।

નિષ્પ્રત્યૂહવૃષાદ્રિનિર્ઝરઝરત્કારચ્છલેનોચ્ચલન્ var નોઞ્ચલન્
દીનાલમ્બનદિવ્યદમ્પતિદયાકલ્લોલકોલાહલઃ ॥ ૧૦૮॥

॥ ઇતિ કવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
વેદાન્તાચાર્યસ્ય કૃતિષુ દયાશતકં સમ્પૂર્ણમ્ ॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

॥ શ્રીરસ્તુ ॥

This stotra is unique in several respects. In the History of Religious Literature, vedAnta deshika is the first poet-devotee to sing a whole hymn in praise of the Lord′s dayA. (Mercy, Grace, Sympathy and Compassion are some of the meanings which that term connotes). In fact, dayA has been personified as dayA devI and made a Consort of the Lord. The other Consorts, lakShmI, bhUdevI and nIladevI are all dear to the Lord because they are reflections of dayA devI. (599). Among all the auspicious attributes (kalyANa-guNas) of the Lord, dayA is the Empress (593, 664). But for dayA′s presence, all the other guNas will virtually be doShas (faults) in the Lord so far as we are concerned (578), as they will all help Him only to punish us for our sins. The Lord Himself dons dayA as a protecting armour against our sins which assail Him. (591). The two chief aspects of the Lord's supreme glory, jagat-vyApAra and releasing souls from saMsAra, for which He is praised by the Vedas, are really dayA devI′s achievements (631). dayA is defined as the Lord's wish (ichChA) to protect those in distress (634) .

shlokas 1 to 100 are seen to consist of ten distinct topics from the way each set of 10 shlokas is couched in a different metre (vRittam). On closer scrutiny, the ten decads (units of 10 shlokas) are seen to deal with the ten topics of the ten hundreds of Nammalwar′s Tiruvaimozhi as demonstrated by deshika in his dramidopaniShad-sAram and ratnAvalI ″sevA-yogya′″ etc. Those very words are used in several places in the stotra, Thus dayA shatakam is the essence of bhagavad-viShayam, as Tiruvaimozhi is called. The word dayA or one of its synonyms such as kRipA, anukampA or karuNA, occurs in every one of the 108 shlokas except two (571 and 609).

Lord shrInivAsa of the Seven Hills (Tirumalai-Tirupati)—the God of millions of men and women of bhArat who call Him ve NkaTesha, Govinda, bAlAjI and so on– is the Lord to whom this stotram is dedicated in the sense that it is His dayA that is eulogised here. For Himself, however, He has only one shloka in His praise (572) and that too in terms of His dayA as an Ocean of Mercy. Lord shrInivAsa having Himself come down as vedAnta deshika, it is in the fitness of things that He does not sing about Himself.

dayA is placed above the Lord in several shlokas 574, 576, 626 and 627. The Lord Himself is all admiration for the way dayA functions (633, 670, 692). It is at the command of dayA devI that the Lord takes the several incarnations (598). The part that dayA devI played in the several incarnations is dealt with in detail in the ninth decad of the stotra (645 to 653). dayA is but an alter ego of shrI or lakShmI (569 and 635).

dayA shatakam is said to be the outcome of the Lord's own sa Nkalpa or Will. In a happy mood the Lord gave it out through deshika, like an expert musician playing on the vINA for his own delectation (667).

Encoded by Malleswara Rao Yellapragada malleswararaoy at yahoo.com
proofread by Malleswara Rao Yellapragada, T K Gopalan tkgopalan at gmail.com
and PSA Easwaran

---

*dayAshatakam*
pdf was typeset on August 17, 2024

Please send corrections to *sanskrit@cheerful.com*